# गुरुकृपालहरी

## १ मङ्गलतरङ्गः

श्रीविद्याभरणं त्रयीमयमहापद्माटवीचारणं
कल्याणाचरणं सदाशिवसदानन्दामृतापूरणम् ।
विघ्नानानां विनिवारणं सुकविहृत्पङ्केरुहप्रेरणं
हैरम्बं चरणं व्रजामि शरणं वाग्वैदुषीकारणम् ॥ ॥ १ ॥

आदिक्षान्त समस्त वर्णनिचय व्यञ्जत्तनूवल्लरीं
आविघ्नेश्वरपादुकान्त गुरुमन्त्रा पुरी सुन्दरीम् ।
आब्रह्मानुभवाणिमादिसकलैश्वर्यक्रियाचातुरीं
आपादाग्र शिरस्सुधारसझरीं वन्दे गिरामीश्वरीम् ॥ ॥२॥

शिशिरकर किशोर स्मेर कोटीरकोटीं-
वशिजनहृदयान्तः कौसुमारामवाटीम् ।
निजशिशुवदनाब्ज न्यस्त कर्पूरवीटीं
परमशिववधूटी मीं नुमः कामकोटीम् ॥ ॥३॥

बैरागीति तपः प्रसिद्धमहसां साहित्यसीमाजुषां
गायत्री परदेवता परशिवब्रह्मैक्यमासेदुषाम् ।
मद्भाषा परमप्रसन्नकविता योगामृत श्रीप्रपा-
कल्पानामनुसन्दधाम्यनुपदं विद्यागुरूणां पदम् ॥ ॥४॥

प्रासादं पदमाश्रये शिवमयं ज्योतिर्मयं चिन्मयं
यन्नैरन्तर भावना विधिबलात्तत्तन्मयट्प्रत्यये ।
व्याक्षिप्ते गुणगुण्यभेदमधुरा तत्वैकताना मतिः
स्याच्छान्तिस्सहनाववत्विति च सा श्रौती भवेत्सार्थका ॥ ॥५॥

# २. स्वरूपतरङ्गः

आम्बा साम्बायितं तेजः वाणी वीणायितां गिरम् ।
पद्मा सद्मायितं पादं श्रीगुरो श्शरणं भजे || ॥६॥

वाणी यन्मुखतस्स्वयं कलयते वीणां पुनर्यत्पदे
लक्ष्मीर्यत्र शिवोदय स्सुकवितासृष्टिश्च यत्राच्युतम् ।
रक्षाकार्य मतो जगद्विलयनं यत्राऽद्भुतं शाम्भवं
वन्दे तत्किमपि त्रिशक्तिक महो त्रैपूरुषं गौरवम् || ॥७॥

रक्तान्त स्पृहणीय दीर्घनयनं स्वाकुञ्चित भ्रूलतं
हासस्मेर मुदारफाल फलकं स्फूर्जत्कपोलारुणम् ।
श्रीकर्णं सुनसं सुचारुरदनं पूर्णेन्दुबिम्बाननं
वन्दे श्रीगुरुमूर्तिमिन्दुमकुटं श्रीकामपीठाधिपम् || ॥८॥

श्रीकेलीसदनायितं पदयुगं यानं मदेभानुगं
पादाग्रं जितकूर्मपृष्ठममलं श्लक्ष्णञ्च जङ्घायुगम् ।
आजानु प्रविलम्बि बाहुयुगलं वामं पुनर्वामनं
यस्य स्वर्ण सवर्णमन्वहमहं वन्दे गुरोर्विग्रहम् ॥ ॥९॥

पदं संविल्लक्ष्म्यास्पद ममृत निष्यन्दि वदनं
कलावैदग्ध्यानां सदनमभवच्छङ्कर गुरोः ।
यदाधारात्तत्तन्मधुर मकरन्दामृतझरी
परीवाहा द्धृप्तं कविमधुप बृन्दारक कुलम् || ॥१०।॥

आरुण्यं सकलाङ्गके नयनयोरन्ते च मन्दस्मिते
शौकल्यं यस्य तु पीतता करतले देवी हरिद्रार्चनात् ।
श्रीरुद्राक्ष किरीटकोटि पटले सौधाकर श्रीकला
शाट्याङ्गैरिकमर्चये शबलितं वर्णैरवर्णं गुरुम् ॥ ।।११॥

श्रृङ्गारं महसीन्द्रियार्थविजये वीरं स्वभक्तार्भके-
व्यक्तं सत्करुणं विभूतिकलया त्वामद्भुतं बालकैः ।
हास्यं चाथ भयानकं भयविधे रक्षस्सु बीभत्सकं
रौद्रं दृश्यलये स्वयं नवरसं शान्तं भवन्तं नुमः ॥ ॥१२॥

काशी मूर्तिरवन्तिका गुरुकृपा ब्रह्मण्ययोध्यामतिः
माया साप्यणिमादि भूतिरमला काञ्ची विहारस्थली ।
व्यक्तं द्वारवतीच वागपि गुरोरद्वैतभावोदये
सूक्तिश्श्रीमधुरेति मोक्षनगरीश्रृङ्गारमीडे गुरुम् ॥ ।।१३॥

स्मिते मुक्तां, वज्रं मनसि निशिते, गारुडमणिं
विषत्यागे, पद्मं पदि, शुभमतौ पुष्यक मपि, ।
तृणौन्मुख्ये नीलं, वपुषि च प्रवालं, मसृणता-
स्थितौ गोमेधं, त्वां भवमिहविदूरे त्विषि, भजे ॥ ।।१४॥

मन्दारं यशसा स्वभक्त जगत स्सन्तानकं नन्दने
कल्पं श्रीमखभोगयोगकलनेनाशीतलेनात्मना ।
सम्भाव्यं हरिचन्दनं सुमनसा तं पारिजातं भुवि
प्राप्तं सर्वसुपर्वभूरुह वराकारं गुरुं संश्रये ॥ ।।१५॥

श्रुत्यन्तश्री कुवलयवनोन्मीलने राजबिम्बं
ब्रह्मब्राह्मीमृदुलनलिनी खेलने राजहंसम् ।
श्री चक्रान्तर्वलयितभुवां पालने राजराजं
वन्देऽद्वैतस्वदमथमहाभिक्षुकं राजमौलिम् ॥ ।।१६॥

भाष्यैर्ब्रह्मविवेचनाय मिलित स्वान्तेवस द्वेदवि-
द्वर्याणां हृदये स्मिताङ्कुर रुचा मौनेन मुष्णन् तमः ।
काषायं परिवेषमण्डलमिव ब्राह्म्या वसान शिश्रय-
स्तद्ज्योतिः किमपि प्रबोधयति यज्ज्योतिस्तदे वाश्रये ।। ॥१७॥

कल्याणावसधं सतामवभृथं ज्ञानाध्वरे वैबुधं
धामाद्यं दलितक्षुथं श्रुतिरथ प्रस्थानघंटापथम् ।
भेदज्ञान गिरीन्द्र भेदन समुत्सेधं सुरेन्द्रायुधं
सेवे श्रीगुरुबोधमागम महासौधाग्र गुप्तार्थदम् ।। ।।१८॥

द्वैताद्वैत विशिष्टवादकुशलै रद्वैतभक्त्यर्चितं
सारासार विचारचारुमनसां संख्यावतां वल्लभम् ।
स्वाप्तानाप्त समस्तजीविसदयं ज्ञान श्रिया माश्रयं
वन्देऽद्वैतगुरुं समस्त जगतां धीशङ्करं शङ्करम् ॥ ।।१९॥

ओङ्कार श्शरणं सता मनुभवश्रीरातिथेयं महा-
विद्या सोपनिषत्कळा च गृहिणी पुत्रस्स्व आत्मा विभुः ।
सर्वस्वं त्वणिमादिकं परतरे चेतोरति स्सारति-
र्गार्हस्थ्यं त्रिजगत्कुटुम्बिन इदं चित्रं परिव्राजिनः ॥ ॥ २० ॥

श्रीमच्छन्द्रकिशोर शेखर गुरो रत्रावतारा च्छ्रिया
नाम्नाऽसौ जयवत्सरो जयति तन्मासोऽपि सन् माधवः ।
सा कृष्णप्रतिपत्तिथिर्विजयते सर्वादिमो वासरः
मङ्गळ्यं मृदुभञ्ज मैत्रमभवल्लग्नंच पञ्चाननः ।।।।२१।।

जयोदयेनाऽथ जितेन्द्रियत्वात्
जयाभिनन्द्येन जयेन्द्रभासा ।
दयाभिरामेण धियाप्यनेन
श्रिया च सर्वज्ञपदं विजिग्ये ॥ ॥२२॥

## ३. अर्चातरङ्गः

सायं प्रात स्सन्ध्ययो स्सन्निधाने
भावद्रव्यैरर्चिता मानसाब्जे ।
स्वौन्मुख्यं मे कल्पयन्त्यात्मभूत्या
येऽहं तेषां किङ्करश्शङ्कराणाम् ‖ ॥२३॥

पादे पद्मं हृदयकमले चारुकल्हार पुष्पं
कण्ठे शङ्खं नयन युगळे नव्यनीलोत्पले द्वे ।
कुन्दं दन्ते ह्धर पटले पाटलं चम्पकं च
घ्राणे मल्लीं स्मितजुषिमुखे श्रीदळं श्रीललाटे ‖ ॥२४॥

भूसान्निध्ये सुमशरधनुः पुष्पमात्रं कटाक्षे
साहस्रारं तदनु परमं नागलिङतं तदग्रे ।
गाङ्गेयाब्जं शिरसि मकुटे मञ्जुलं चन्द्रकान्तम्
विन्यस्यैवं गुरुवर शिवाराधन प्रक्रियायाम् ॥ ॥२५॥

द्रव्याद्वैत प्रसृत सुमनोमुद्रया न्यासभङ्ग्या
माराध्याराधन परिकराभेदभावं भजन्ती ।
योगारूढ़स्थिति परिणताद्वैतसिद्धिं गतास्मी
त्यन्तः खेल त्यनुभवरसे राजहंसी मतिर्मे ‖ ॥२६॥

बिम्ब स्त्वं प्रतिबिम्ब एष भवदालम्बः कदम्बो गिरा-
मव्यक्तं मणिदर्पणे मनसि मे व्यक्तं स्वरूपं तव ।
येन प्रस्फुरति प्रभो । प्रतिपदं तत्स्वार्थ माभूषयत्
श्री देव्या उपचार चारुरचना चातुर्यधुर्योत्सवे ‖ ॥२७॥

स्वस्ति, स्वस्तिक मा दधातु कदलीद्राक्षाफले वाक्परी-
पाकं मोक्ष मपूर्वमेव कुरुता दुर्वारुकं बन्धनात् ।
चूत स्तापशमं समाधि मतुलं निर्बीजिका गोस्तनी

दद्यान्मे गुरुभुक्तशेषममृतं तत्तत्फलं स्वोचितम् ॥॥२८॥

यद्यत्कर्म करोमि तत्तदखिलं शम्भो । तवाराधनं
भूयादित्यनुसंहितं सुकृतिभिः किं वाप्यकर्तुं र्मम ।
किं वक्तव्यमथाप्यभावमपि यद्ब्रूयुः पदार्थं बुधाः
तद्वक्ष्ये यदकर्म मे तदपि ते ह्याराधनं स्यादिति || ॥२९॥

क्लीबे ब्रह्मणि मन्मन श्रीमति शक्त्यां स्त्रियामेकतां
गन्तुं सङ्ततमेव पुंसि गिरिशे साक्षादुरौ नोभवेत्, ।
नाद्वैतं गुरुणा सहेतिच वचस्तेनेरितं तद्गता -
वात्मैवाऽल मतो भजे शिवगुरुं स्वात्मान मेवात्मना ॥ ॥ ३० ॥

निरङ्कुशं संविवशं मनो मे
न पारयेत्सुन्दर तेऽनुभूत्यै ।
मनोहर स्तत्सकलं सबीजं
हर प्रभो येन ममेष्टसिद्धिः || ॥३१॥

अल्पायुष्ट् मपण्ड़ितैरिहसुख व्यासक्तधीविभ्रमै-
स्तापग्रस्तजनैः प्रचिन्तितमहो मृत्युञ्जय त्वद्धियाम् ।
नोभीति र्नमृति र्जनि र्नच रुजा तेषां स्मरारे सुधा-
रोचिश्शेखर । ते जयन्ति नितरां दीर्घायुषा वर्चसा ।। ।।३२।।

## ४. प्रसादतरङ्गः

श्री नारायणभट्टपादगदितं नारायणीयं सुधा-
स्वादं मातृवचोभि राकलयता लब्धा परोक्षं गुरोः ।
श्रीमद्वायुपुरेश्वरस्य करुणा तत्पादपद्मोद्भवा
धारासाप्यमृतस्य ते रसयति स्तोत्रे ममेदं वचः ॥ ॥३३॥

परापश्यन्त्यादि स्फुरति सकलं वाग्विलसनं
तुरीयं तत्रैकं पशुनिगदितं बाह्यविदितम् ।
स्वयं गृह्णन् मौनी गुरुरथपरां भेदविधुराम्
अभिज्ञो नः पुष्णास्यनुभवपरां बोधमधुराम् ॥ ॥३४॥

महिम्नः पारम्यं चुळुकितपयोधे र्यदि मम-
प्रभोः कारुण्याब्धेरहमपि कळां स्वादु रसये ।
मति मन्थानाद्रेर्यदि मम तुलां यात्यविकलं
सुधापानं कुर्यां तव वचनदुग्धाब्धि मथनात् ॥ ॥३५॥

चकोरी दृष्टिस्स्याद्यदि मम भवन्मुग्धमधुर -
स्मितज्योत्स्ना पानस्फुटरसिकता मञ्चति विभो ।
मराली प्राणानां यदि भवति वृत्ति र्मम भवत्-
पदाब्जश्रीडोलोत्सवरस महोत्साह मयते ॥ ॥३६॥

अलि न्यासीऽच्चेन्मे श्रुतिरपि भवत्सूक्ति सुमनो
रसास्वादस्वादुस्थिरतरगतिं यात्यविरतम् ।
मयूरो भावश्चेन्मम भवदपाङ्तोदयदया-
पयोदच्छायायां तरलतरलायां नटति च ।। ॥३७॥

वाङ्गे न प्रसर त्यसज्जनवृथावार्तारता ते स्तुता
वञ्च त्येव न ते पदं पशुविलासोद्वलगानं मन्मनः ।
स्वाधीनं न वपुः कद न्नविवशं त्वत्पादसेवाविधा-

व प्येवं गुरुदेव ते मयि तव प्रेमावधिं लङ्घते ।। ॥३८॥

छन्दोऽलङ्कृतिनैगमार्थविधुरं तर्का प्रतिष्ठं परं
भक्तिज्ञानविदूर मौपनिषदे तत्वेऽप्यपारंगमम् ।
शब्दब्रह्मणि मूकमप्यकुशलं सारस्वतोपासने
का वा ते करुणागुरो किमपि मां वाचालय त्यद्भुतम् ॥ ॥३९॥

न भावनेष्टि र्नपदार्थरिष्टिः
न पाकदृष्टिर्नच धातुपुष्टिः ।
अथाऽपि मे श्रीगुरुकाव्यसृष्टेः
स्रष्टु स्सुभावार्थरसप्रवृष्टिः ॥ ॥४०॥

कृपा रूपं स्वीयं प्रकटयितुकामो मयि पशा-
विहैवं श्रुत्यन्तस्फुरदरुणरेखं तव पदम् ।
पदं वाचां धत्से प्रतिपदसुधादोहमधुरं
वृषात्माऽहं रौमि स्वरमयमुपैतु स्वरसताम् ॥ ॥४१॥

सदा मातुर्वाचं पुनरनुवदन् मुग्धमधुरं
शिशुर्मात्रा साकं जनयति मुदं सर्वजगताम् ।
ददत् त्वद्वाचं ते ह्यनिश मुपदां त्वत्कृतपदां
तवानुग्राह्योऽयं, कविरपि मुदां पात्रति विदाम् ॥ ॥४२॥

कालेऽस्मिन् कविता यशोव्यसनिभिश्चौर्यात्पदाहर्तृभिः
काव्यं तत्करकोपलेन रचितं पात्रं न चान्द्रोपलम् ।
स्यन्दा त्तत्क्षणमेव नश्यति यतस्तत्राहितो यो रसः
सोऽपिस्यात् क्षणभङ्गुरो गुरुधियां स्वादाय नो कल्पते ॥ ॥४३॥

आचार्यस्मित चन्द्रिका प्रसरणा दन्तर्बहिश्चिद्रस
स्यन्दिन्यां कवितासुधाकरमणिद्रोण्यां तदेकात्मकम् ।
दिव्यं पायस मागलं प्रपिबतां प्राचां ऋ षीणां कृपा-

सारं सारतरं तदौपनिषदं सारस्वतं जृम्भते || ॥४४॥

श्रीपादैस्स्वयमत्र मे कृतिशिशो र्नामोत्सवः कार्य इ –
त्युक्तं क्काऽपि मया तवाऽस्ति हृदये यत्तन्ममास्त्यस्तु तत् ।
नामेत्यूचु रियंततो गुरुकृपाधारालह र्युच्यते
पारम्यस्य गुरोः पदं च तदिदं सार्वज्ञ्यसार्वात्म्ययोः || ॥४५॥

पायंपाय मुदारदेशिक कृपाधारा सुधारा गिरां
गायंगाय मशेषसद्गुरु यशोगाथा अगाथा श्रिया ।
ध्यायंध्याय मनन्तबोधककृता आज्ञा उपज्ञा श्रुतेः
हायंहायमबोधमद्वय सुखोत्सेधं प्रबोधं व्रजे ।। ॥४६॥

प्रतिवर्णं प्रति शब्द
प्रति वाक्यं ते प्रति प्रबन्धमपि ।
प्रतिपन्मधुरं विशति
प्रतिमुखमिव मे मनोमुकुरे ॥ ॥४७॥

प्रत्यक्ष कल्याण भुवे सुनाम्ने
प्रत्यर्थपीयूष दुहे स्वधाम्ने ।
प्रत्यक्षर स्वादुरसैक सीम्ने
भूम्ने नमस्ते निगमाग्रधाम्ने || ॥४८||

## ५. अनुभूतितरङ्गः

यस्यां तमो विकलयन् कलयन् स्वदीप्त्या
ज्योतिस्सुधाकरमयं तमसः परस्तात् ।
वृद्धिं व्यधाद्गुरुरलौकिक शब्दसिन्धोः
साऽऽद्यानिशा स्फुरतु योगदशाऽनिशं मे || ।।४९।।

ओङ्कार मूर्तिमधिरुह्य लतान्तशय्यां
पल्यङ्किकां परिदधत् कलहंस चिह्नम् ।
स्वर्णाङ्किराङ्कव महो नगरोत्सवे त्वं
नेत्रोत्सवं व्यरचयः कुसुमैः किरन् नः || ॥५०॥

ग्रामान्तरे मदनुजः स्थित ईक्षणानां
साफल्यदं क्षणमिमं कथमद्य पश्येत् ।
इत्येवमात्मनि विचिन्तयतो ममाग्रे
प्रादर्शयस्सपदि तं त्वमहो स्वभूत्या || ॥५१॥

दृष्ट्वा कृतान्त मपि तं मयि चापतन्तं
रक्ताक्ष मीश । महिषं धरणौ शयानः ।
हा चन्द्रशेखर । शिवेति गृणन् क्षणायुः
मूर्छा गतोऽहमथ तत्र समाविरासीः ।। ॥५२॥

पश्यल्ललाटमथ दण्डधरं भवन्तं
पश्यन् पुनस्सपदि दण्डधरश्च भीतः ।
पश्चात्पदं नतशिरा अदमद्यमस्य
वाहस्समुग्रगवलोऽम्बर मुत्पपात ।। ॥५३॥

भाग्यं त्वदर्चनविधौ यदि मे ह्युपाधिः
तिष्ठत्वयं सपदि गच्छतु वाऽन्यथाचेत् ।
इत्युक्तवन्तमथ मामनुभूतिसारैः

आजीवय स्सकरुणामृत हक्प्रसारैः || ॥५४॥

जन्मज्वरोपशमनाय मयार्थित स्त्वं
दृष्ट्वा वपुर्ज्वरितमार्तजनैकबन्धो ।
दत्वाऽमृतं च कृतवान् परमां चिकित्सां
तं त्वां भवज्वरभिषग्वरमाश्रयामि || ॥५५॥

मूकाय वाचमददा स्त्वमदाः स्तुतौ ते
मूकाय मह्यमपि सुन्दरदेववाणीम् ।
द्वैतेतरं बहु तदा विवृतं त्वयैतत् –
आनन्दताण्डव विलास मनुस्मरामि || ॥५६॥

संसारपाशनिचयैरहमस्मि बद्धो
नेशे भवन्त मनुगन्तु मिति ब्रुवन्तम् ।
मामब्रवीरहमपि त्वयि रागबद्धो
लोकान्तरेऽप्यनुगमिष्य इति प्रभुस्त्वम् ॥ ॥५७॥

एकान्तत स्समवधार्य मदार्तवाचं
प्रस्थानयान मनु मे वितरन् प्रसादम् ।
हार्देन वत्सल रसार्द्रविलोक नेन
त्वं चाग्रहीः प्रियमुदा हृदयार्पणं मे || ॥५८॥

गङ्गामहं समुपनीय च कृष्णवेणीं
गोदावरीमथ कवेरसुतां सदारः ।
दिव्याभिषेचनविधिं कृतवान् कटाक्षैः
आसेचय स्त्वमपि नौ करुणामृतौघैः || ॥५९॥

शास्त्रैरगम्यमिह मे गुरुशास्त्रगम्यं
ब्रह्मेति यद्रहसि किञ्चि दवादिषं त्वाम् ।
मौनं विधाय निजबोधरसैकमानं

तत्राऽकरो स्सदय मे हृदयं सुधीरम् || ॥६०॥

भ्रष्टोऽस्म्यहं श्रुतिपथा न्निजवंशवृद्धैः
आराधितादितिरुदन्तमवेक्ष्य दीनम् ।
शिष्टं व्यधाः कृपणवत्सल । मां त्वदीय
पादारविन्द कलहंसकुलैकजुष्टम् ॥ ॥६१॥

वाग्लौकिकी मम न भाति तव स्तुता वि-
त्याकर्ण्य मद्वचनमङ्ग कृपान्तरङ्गः ।
त्वं मेऽकृथा श्शुकवचस्यथ पूर्णसङ्ख्या
सौन्दर्यसारसफला मयि मन्त्रदीक्षाम् || ।।६२।।

गीर्वाणवृत्तचयलक्षण मन्वपृच्छ -
स्त्वं मां कदाचि दधिरुह्य मृगेन्द्रपीठम् ।
धृत्वा च शेषगिरिनायकशेषवस्त्रं
कौशेयमेतदुपदेश इहाऽभवन्मे || ॥६३॥

देवालये त्वदनुशासनतस्सलज्जः
पद्यं हरावपठमेकपदेन लुप्तम् ।
वेणुः क्वचाभवदिति स्मितपूर्व मुक्त्वा
तच्चानय स्स्मृतिपथं पदमद्भुतं मे ।।।।६४।।

कालोऽल्प बुद्धिशबलः परमाविभूतीः
दृष्ट्वा त्वयि व्रजति भक्तिमहो निजाऽर्थे ।
स्वल्पं समर्पयति कामयते ह्यनल्पं
न स्वं ददाति सकलस्वमपेक्षते च ।। ॥६५॥

श्रीचक्र वर्तिनमिवाकलये भवन्तं
मां चक्र वर्तितनयत्व मतोऽनुयाति ।

ते नाप्तकाम इव चाऽस्म्यबुधोऽप्यकामः
सर्वस्वभू स्त्वमिह मे यदभू स्स्वकीयः ।।||६६||

अस्त्येतदस्ति न ममेत्यनुचिन्तनेऽपि
भीतोऽस्मि यन्मम मन स्त्वयि सन्निविष्टम् ।
तत्स्पन्दनं किमपि तत्त्वयि तत्र भाति
ते नाऽप्रयत्नमिह याम्यमनस्कयोगम् ॥॥६७॥

कदाचिदाप्तैः परिवेष्टित स्त्वं
कवेरकन्या रसवीचिकासु ।
तथाऽनुजे श्रोतरि भिक्षुसूत्रै
र्व्यथाः परोक्षं मम भाष्यशान्तिम् ।।॥६८॥

उषस्यदा दर्शनमेकदा मे
काषायवासाः कलितात्मदण्डः ।
हासप्रसन्नं शुभवत्सरादौ
चित्रं ममैतन्नजहाति चित्तम् ॥ ।।६९।।

चित्रं ह्याङि्गतक विभ्रमो भ्रमहरः प्रासङि्गतक स्स्वाश्रिते
रागश्चाखिल रागबन्धनहरः कर्माप्यकर्मास्पदम् ।
प्रज्ञा सा प्यतिलौकिकी स्फुरति नः प्रज्ञा प्रभो लौकिकी
निष्ठा ब्रह्मणि मे गुरो स्स्वजनसंरक्षैक निष्ठाद्भुतम् ॥ ॥७०॥

रम्यं वीक्षितमर्थवत्सुमधुरं मन्दस्मितं भाववत्
हृद्यं स्पन्दनमाधरं स्वरसवन्मौनं महावाक्यवत् ।
पारोक्ष्यं ह्यपरोक्ष वस्तुसुखवत्तात्पर्यवद्दर्शनं
स्वप्ने जाग्रति मे गुरोर्विलसितं सर्वान्तरं ब्रह्मवत् ॥ ॥७१॥

चित्रं पर्णशदे प्रदोषसमये यस्संनिली यान्तरे

मातुर्मे चरणाङ्गुलीयक महो पूज्यं हरिष्णोर्व्यथाः ।
शिक्षां मातृरिरक्षया भगवतेऽस्मै पर्णशद्याय ते
लीलाताण्डवपण्डिताय श्रुतिसंवेद्याय कस्मै नमः ॥ ॥७२॥

सर्वा ऽप्यणिमादयो हि वृणते त्वामीश्वरं भूतयो
नाश्चर्यं स्व महिम्न्यधिष्ठितवतो नाऽवादरोऽनादरः ।
स्वस्मान्निस्सृत सप्तरश्मिविभवं दृष्ट्वा स्वयं ज्योतिषां
ज्योति स्साऽपि सहस्ररश्मिरयते किं किञ्चि दप्यद्भुतम् ॥ ॥७३॥

## ६. ललितातरङ्गः

ब्रह्माहुर्हि नपुंसकं पुरुष इत्याहु भवन्तं परे
चित्रं तद्विषमं हि शास्त्रवचनं तत्त्वं गुहायां स्थितम् ।
श्री माता गुरुदेवते त्यह मये मानं कृपा पण्डितैः
वादो यद्यथ मौनमेव शरणं सेवेऽनुभू त्यात्मनि || ॥७४॥

सत्त्वादि त्रिगुणं प्रधान मुदितं वर्णैस्सकारादिभिः
स्त्रीशब्दे गुणबोधकैह्र्युपरि तत्तुर्यस्वरश्चित्कला ।
ईकार श्चिदधिष्ठिता प्रकृतिरित्याख्याति सा देवता
शक्ति स्सा जननी समस्तजगतां त्वामेव तां भावये || || ७५ ।।

कामाक्ष्येव नकाऽपि मन्दगमना रूपे ह्युषो देवता
सर्वाङ्गीणनवारुणारुणरुचा वालापने शारदा ।
माता मामकलालने मधुमती विद्या रसासेचने
गायत्री गुरुदेवता निजशिशुत्राणे भवेन्मामिका ॥ ॥७६॥

सोमा शम्भु विमोहने मधुरिपोर्भामा धनापादने
श्यामा श्रोत्रियजीवने पुररिपो रामा रसासेचने ।
भीमा द्वैतविभञ्जने श्रुतिशिरस्सीमा सुधीरञ्जने
सामांकाऽप्यनुकम्प माकलयते धामाऽनुकम्पाऽद्भुतम् ॥ ॥७७॥

ब्राह्मी ब्राह्ममुहूर्तके तनुरुचा सर्वारुणा ऋङ्मयी
रौद्री शुभ्ररुचि र्यजुर्मयतनू र्मध्याह्न काले तथा ।
कृष्णा साममयी पुनस्तदपरा सायन्तनी वैष्णवी
गायत्री गुरुदेवता मम सदा छन्दोमयी द्योतते । ॥७८॥

नूनं पञ्चदशं भवान् तिथिकुलं तन्मौलिगा षोडशी
या सा त्वं बहिरन्तरङ्गविषया पर्यायतो गोचरा ।

राजस्यन्तरथादिमे सुविशदा पूर्णा च सत्वात्मिका
स्थाने वाऽन्यतरे तथा सुमलिना दर्शाकृति स्तामसी ।। ।। ७९ ।।

एवं भावनया ऽनया तव जगत् स्थित्यादिक प्रक्रिया
कर्तृत्वं तदतीत षोडशकलाकल्पत्व मङ्तीकृतं ।
स्यादित्यन्तरुपास्महे हि तमसो यत्तत्परस्तात्परं
ज्योतिः ज्यौतिषमण्डलादपि परां त्वां तां कलां षोडशीम् ।। ॥८०॥

श्रीगौरी किमु काऽपि कन्नडकला त्वं भैरवी रञ्जनी
कल्याणी श्रुतिरञ्जनी त्वमथ सा हंसध्वनि र्वर्धनी ।
धन्यासि स्वरभूषणी च विजयश्री स्त्वं मराली गुरु-
स्त्वं सोमाभरणाकृतिः स्फुरसि मे रागस्वरूपा हृदि || ॥८१॥

स्वीयं स्वार्थपरं स्वभावसकलं संवर्धयन्ती कुलं
निस्स्वं पुण्यजनं स्वरूपविकलं तं वञ्चयन्ती मुहुः ।
काञ्च्यां श्रीतरुणेन्दुशेखरमनस्सम्मोहिनी मोहिनी
मूर्तिः काऽप्यतिवेलमत्र कुरुते द्वैतेतरं विभ्रमम् ॥ ॥८२॥

कैलासाऽचलचुम्बिनीं श्रुतिशिरः कादम्बकादम्बिनीं
कैवल्यामृतवर्षिणीं निजपदध्यानैक संहर्षिणीम् ।
काव्यालापविनोदिनीं निजयशस्सङ्तीत सम्मोदिनीं
वन्देऽस्मन्मतिनन्दिनीं गुरुकलामानन्दनिष्यन्दिनीम् || ॥८३॥

राज्ञी त्वं गुरुरूपिणी त्रिजगतीसाम्राज्यलक्ष्मीः श्रुति-
स्तत्राज्ञे स्मृतिरप्यपारकरुणावृष्ट्या च तुष्टिं पराम् ।
पुष्टिं चाऽपि तनोषि ते करधृतो दण्डस्तु मन्त्राञ्चितो
मृत्योर्वाऽपि भयङ्कर स्सुकृतिनां क्षेमङ्कर स्त्यागिनाम् ॥ ॥८४॥

मात्रे कुप्यति डिम्भकः प्रतिपदं स्तन्याय रुन्धन् पदं
क्षुदज्ञा साऽपि ददाति सुष्ठु समये तं लालयन्ती पयः ।

इत्थं श्रीगुरुदेवते त्वयि ममाप्याक्रोश आत्मार्थकः
त्वन्मे यत्समये हितं कुरु तदेवात्यन्तिकं मङ्गलम् || ॥८५॥

अम्ब त्वं कलयस्ययाचित महो यन्मे हितं ते हितं
मातस्त्वं वितरस्य तर्क्यमपिमेऽश्रेयोऽमृतं त्वां ऋ तम् ।
देवि । त्वं श्लथय स्यचिन्त्यमपि मे चित्तभ्रमं सम्भ्रमम्
केयं ते गुरुदेवते । मयि कृपा मेयं पदं लङ्घते ॥ ॥८६॥

भिक्षावृत्त्यनुशिक्षणं कृतवती ब्रह्मोपदेशे पुरा
लक्ष्मी र्मेजननी स्वयं भुवि पुनर्ज्ञानेन जातः पुनः ।
भिक्षावन्दन मातनोमि जगतां मातु स्तवाग्रे महा-
भिक्षो । किं विदधास्यतो वितरमे साक्षात्स्वरूपं हि मे । ॥ ८७ ॥

श्रीभोगेश्वरनामभूषणवतो लब्धा जनिर्मे स्थितिः
तस्मा देव गुरोर्ममाद्वयसुखे स्याद्वा लयो ब्रह्मणि ।
शक्ति स्तत्र भवान् गुरुर्गुरुकृपा प्राथम्य पारम्ययोः
हेतु स्त्वा मपुनर्भवाय जननीं वन्दे परां देवताम् || ॥८८॥

कुमारस्तेऽभूत्प्राग्जननि जगतां य स्स जगतां
कुमार श्री देव्या स्तव च जनको लोकजनकः ।
तवान्तेवासी यस्स्मरयमनियन्ता स जगतां
तथान्तेवासी सन् जयति जननं मृत्यु मपि च ।।।।८९।।

नानालोकालोकदक्षा मलोकां
नानाभावाभावमूला ममूलाम्
नानाकल्पाकल्पलीला मलीलां
नानारूपां त्वा मरूपा मुपासे ॥ ॥९०॥

## ७. शिवलीलातरङ्गः

शक्ति श्शम्भु रितिद्विधा निगदितं यच्छेष शेष्यात्मकं
वागर्थाकृतिकं पुराणमिथुनं बिन्दुत्रिकोणायितम् ।
हंसद्वन्द्व महो विमर्श इति यद्यच्च प्रकाशः परः
तद्वन्दे गुरुमूर्तित स्समुदितं चित्सामरस्यं महः ‖ ॥९१॥

उत्सङ्गे मां शिशुवदकरो दन्नपूर्णाभवान्याः
गृतायां मे ह्यघटयदहो बालतारङ्ग केलीम् ।
डोला लीलामकलयदिमां यस्त्रिवेण्यां प्रयागे
सोऽयं काश्यां शिव इह गुरुस्सन्निधत्तेऽव काञ्च्याम् ।। ।। ९२ ।।

आसृष्टेरियमेव जीवसरणिर्यात्माभिमुख्येतरा
सुस्पष्टं च पराञ्चि खानि व्यतृणद्यत्तत्स्वयम्भू स्स्वयम् ।
धिग्जीवान् परमाद्भुताद्भुतकृपालीलावतारे श्शिवे
त्वय्येवं चरति प्रभौ प्रसरति प्रीतिर्न तेषां गुरौ ।॥९३॥

स्तेनानां पतये तुभ्यं मुष्णतां पतये नमः ।
तस्कराणां च पतये तमसां मनसां भियाम् ‖ ॥९४॥

हरश्च मे हरिश्च मे ह्युमा च मे रमा च मे
सकोऽपिमे सुवाक्चमे नकोऽपि मे त्वमेव मे ॥ ॥९५॥

द्वैतमिव कालकूटो गले गृहीत स्समस्तलोकानां ।
शङ्कर भवत्कृतं तच्छिवं शिवालोचनोत्सवं वन्दे ‖ ॥९६

हालाहलमपि कण्ठे कर्तुर्जगतां हिताय ते भर्तुः ।
हर्तुर्दोषं चाङ्गीकर्तुं मद्वाचमीश किमसाध्यम् ‖ ॥९७॥

लिङ्गं लिङ्गं स्या च्छिवाख्यार्थभेदे

सत्वादीनां य द्विवक्षाभिगम्यम् ।
तस्मात् सेवेऽप्रत्ययं सार्थमेकं
निस्त्रैगुण्यं त्वामलिङ्गं शिवेति ॥ ॥९८॥

शिव शिव शिव एवं तत्पदावृत्तितो मे
वशि वपुरथचित्तं स्या न्निवृत्तौ वचश्च ।
प्रथमममृतबीजं यत्पुरास्वाद्य मन्ते
भवति भव भवन्तं कोह्यतीयात्कृपायाम् || ।। ९९ ।।

उग्रो व्यग्र स्त्वं शिवो लक्ष्यसे यैः
ते नो जानन्त्यग्रभावं गुरो स्ते ।
तद्ज्ञानार्थं नः प्रदेहि प्रभो ।
ता मन्तश्शान्तां शाम्भवीं योगमुद्राम् || ॥१००॥

अर्धाऽर्थयो बिन्दुविभिन्ननादयो-
रपि स्वरूपे परमार्थतोऽभिदा ।
यत्राऽद्भुतं तन्मिथुनं पुरातनं
भजे गुरुत्व प्रतिपन्नगौरवम् || ॥१०१॥

उक्तार्थभेदादपि चार्थतः पुनः
शिवाभिधाने प्युभयार्थसुन्दरम् ।
प्रतिस्फुर च्चन्द्रकिशोरशेखरं
शिवार्थमीडे परमं शिवार्थम् ||॥१०२॥

भयभवयो र्यवमात्रविभेदात्
उभयमिदंभयस्य पदं न ।
अभव इह त्वभवोऽथ भवो नः
प्रभुरभयाय ततोऽप्यभवाय || ।।१०३।।

त्यागयोगसमवेतसम्मुखं
विश्वतोमुखमुपास्महे सुखम् ।
भक्तचित्त नवनीततस्करं
पश्यतोहरमुपाश्रये हरम् ॥ ॥१०४॥

## ८. हरिलीलातरङ्गः

आवृत्ते युगधर्मपादगणिते र्लीलावतारैः पुनः
स्थैर्यं चागमतो गतं जगदिदं मिथ्येत्यमिथ्येति वा ।
किं तै स्तर्कवितर्ककर्कशमतै स्तन्मे जगन्मङ्गलं
धामाऽद्वैत मिदं दृशां हि विषय श्री शाङ्करं वैष्णवम् || ||१०५ ||

दृशाऽमृतं सिञ्चति वै प्रजासु
समाहर त्यद्भुत मिन्द्रियाणि ।
रसातलं चोद्धरते स्वशक्त्या
स्वभक्तबालोत्सव मातनोति || ॥१०६॥

त्रिविक्रमः क्रामति च त्रिलोकीं
स्व तेजसाऽधः कुरुते परौघम् ।
मुनीन्द्रभावान् रमय त्यशेषान्
धियां हि सङ्कर्षणतां प्रयाति || ॥१०७॥

करोति गीतोपनिषत्प्रबोधं
ह्यधर्मनिर्मूलन मातनोति ।
दशावतारात्मक एव मास्ते
भवान् हरि र्मे गुरुराजमौलिः ।। ॥१०८॥

कृते श्वेताख्यं त्वां परमतपसं ज्ञानमहसं
युगे त्रेताख्ये वा निहतकलुषं यज्ञपुरुषम् ।
परं श्यामं तन्त्रप्रकरसुभगं द्वापरयुगे
कलौ पुण्यै रल्पै श्शमितशमलं त्वां हरि मये ॥॥१०९॥

त्वं छन्दसा हि गरुडेन तदाऽविरासीः
यन्मत्तवारण समुद्धरणाय तद्वत् ।

साक्षाद्धरिः गुरु रिहाऽसि समुद्धरिष्णुः
मां कालनक्रशितवक्त्रगतं दयालुः || ॥११०॥

कावेरीतटिनी कलिन्दतनया बृन्दावनं तद्वनं
गीतं किं नरजीवनं भगवता गीतं तदेवाद्भुतम् ।
गोगोपीपशुपालबालक मिदं स्वीयं कुलं गोकुलं
कर्तुं स्वोन्मुख मद्य गायति गुरुर्गोपालबालः कलम् || ||१११||

नादब्रह्म स्वरसमुदयै ष्षड्जमुख्यै स्स्ववंशी
नाले पूर्वं ह्यधरसुधया व्याकृतं यामुनान्ते ।
लीनीकृत्य प्रणवमधुरे वैणवे स्वीयदण्डे
गायत्येकः कलमिह मनोमोहनं ब्रह्मगीतम् || ॥११२॥

मन्दं मन्दं विकचसुमन श्चारुबृन्दावनान्ते
कण्ठे वेणा वधरितसुधां रागतीतिं वितन्वन् ।
स्वायत्तैकप्रकृतिभिरहो भक्तगोपाङ्गनाभी
रासक्रीडां कलयति रहश्श्रीहरिश्श्री गुरुर्नः || ॥११३॥

खेलन् दुष्कलिकाल कालिय महाभोगे विषाग्निच्छटा
भोगे स्वाश्रितगोपगोशिशुकुलं चोज्जीवयन श्रीदृशा ।
गायन् वंशधर स्सदोमिति परं ब्रह्मात्मकं मोहनं
सङ्गीतं नटराजराजचिकुरः को वा नरीनर्ति च ॥ ॥११४॥

# ९. विज्ञानयोगतरङ्गः

यजु स्त्वं प्रयोगे ऋगेव स्तवार्थे
त्व मुद्गीथयोगे तथा सामवेदः ।
त्व माथर्वणं छन्द एवा ऽसि शान्ति
प्रकल्पे ऽविकल्पं भजे त्वामनल्पम् ॥ ॥११५॥

त्वां श्रुत्यन्तै विश्रुतार्थं श्रुतार्थं
विद्यावादैरुत्तरङ्गातरङ्गम् ।
व्यासोदीर्णं द्वापरान्ताऽवतीर्णं
सूत्रात्मानं भावये ब्रह्मविद्याम् ॥ ।।११६॥

छन्दोऽन्त श्श्रीसूत्रगीतार्थ नाना
रत्नश्रेणीशानमीडे त्वदीयम् ।
साधूद्धोष्यं ब्रह्मविन्मौलिभूष्यं
वाग्वैदुष्यं शाङ्कराद्वैतभाष्यम् ॥ ॥११७॥

ब्राह्मं तेजः पाद्मशोभं पदं ते
धामाद्वैतं वैष्णवं तच्च शैवम् ।
मार्कण्डेयं लैङ्गमाग्नेयमेकं
स्कान्दाकारं वामनं श्री भविष्यम् ॥।।११८।।

मात्स्यं कौर्मं तच्च वाराह मुर्व्यां
वेदाद्रीन्द्र क्ष्मासमुद्धारधीरं ।
ज्ञानं तद्वन्नारदीयं शुकोक्ति
श्रीमत्पुण्यं गारुडे याज्य मीडे ॥॥११९॥

ब्रह्माण्डस्थं ब्रह्मवैवर्त मेकं
वेदार्थानां बृंहकं वेदसारम् ।
वेदातीतं वेद गुह्यं भजे त्वां

वेदव्यासप्रोक्त माद्यं पुराणम् ॥ ॥१२०॥

श्रीमच्छान्तनवस्तवोक्त्यभिमुखं गीर्भिश्चतुर्भिः स्फुरद्
ब्रह्मगीत यशोध्रुव स्तुतिपदं श्री भारतप्राभवं ।
देवस्तु त्यभिराममङ्गल महो प्रह्लाद सम्भाषणं
मोहिन्या जगतां श्रिया विलसितं रामोन्मुखाख्यानकम् ।। ।। १२१||

श्रीमात र्यनुवर्तनं यदुपतिस्तोत्रार्थसारं महत्
मार्कण्डेय शिवानुभूति तिलकं मन्दारकल्पं सताम् ।
आकल्पं धृतभावुकं प्रतिनवाध्यायोक्तसारार्थकं
श्रीमद्भागवतं शुकोक्तिमधुरं त्वां श्री गुरुं भावये ॥ ॥१२२॥

नवनवरसपर्व श्रीगुणाढ्य श्रुतीड्यं
परमरसवरिष्ठं धर्मराज्य प्रतिष्ठम्
जयपद समभिख्यं चारुकृष्णाभिमुख्यं
गुरुवर महमीडे श्रीमहाभारतं त्वाम् || ।।१२३।।

निर्वेदाप्यं सांख्यकर्मानुरूप्यं
ज्ञानाल्लक्ष्यं कर्मसन्यासयोगात् ।
आत्म न्यारा त्संयमाच्चाऽपि विज्ञा- -
नाकारा द्वा यक्षरब्रह्म योगात् ॥।।१२४।।

विद्याराजा द्राजगुह्याद्विभूते स्साक्षात्कारा द्विश्वरूपस्य भक्तेः
क्षत्रक्षेत्रज्ञप्रबोधाद् गुणानां व्यक्ते गर्म्यः पौरुषा दुत्तमाच्च ।
देवादीनां सम्पदां वा विवेकात् श्रद्धादीनां मोक्षसन्यासयोगात्
अन्ते गम्यं सर्वगीतार्थसारं ब्रह्मोपासे वस्तु साक्षाद्भवन्तम् ।। ।।१२५।।

बालत्वं शिवधर्मखेलन रमापाणिग्रहऽयोध्यता
त्यागे सन्मुनिलोकरक्षणविधा वारण्यता लक्षिता ।
किष्किन्धाप्ति रवाप्तमित्रकुल सन्मन्त्रोदये सुन्दर –

श्रीश्चूडामणिदर्शने रिपुवधे यौद्धं महो व्यञ्जकम् ॥ ।।१२६।।

आत्मख्यापन वैभवे कुशलिना सर्वोत्तरत्वं पुनः
स्वाराज्यं समवाप्त मात्मनि तथा रामात्मकेन त्वया
वाल्मीकित्व मथास्ति चे द्विधिकृपालेशाच्च मे नामनि
श्रीमत्त्वच्चरितं रसोल्बण मिदं रामायणं कीर्तये ॥ ।।१२७।।

श्रुत्यन्तकेलि विपिनान्तनितान्तकान्त
वासन्तवासर मिहादिगुरुं गुरूणाम् ।
दुस्तर्क कर्कशशिलाक्रकचायमान-
वग्विक्रमाक्रमित नास्तिकचक्र मीडे ॥।।१२८।।

## १०. विमर्शतरङ्गः

त्वा मध्यात्मनभोमणिदीपं
शब्दा दुज्ज्वलया म्यनुरागात् ।
सिद्धि गुणगुण्यविभेदा-
त्सिद्धं शास्त्र मसिद्ध मसिद्धौ ‖ ।।१२९।।

शाब्दीसिद्धिर्मेऽपरोक्षा परोक्षा
चार्थीसिद्धि श्शक्तिरेवात्रमानम् ।
तस्माच्छब्दं पेशलं शृण्वतोऽत्र
स्वार्थं लब्धुं प्रार्थये ज्ञानवृद्धान् ॥ ॥१३०॥

मातुः प्राणे व्योम्निलीने मयोक्त
मानन्दादेवेति वाक्यं प्रमादात् ।
-धीधीत्युक्तं तत्प्रयाणे तयाऽन्त्ये
शाब्दीसिद्धि स्तत्प्रसादः स्तुतौ ते ।। ।।१३१॥

स्थूलं शब्दं सूक्ष्म मर्थं ह्युपास्य
तत्त च्छक्तीराप्य तस्मिन् विलाप्य ।
निर्दग्धेहावासना स्त्वय्यनन्ते
वीरा धीरा यान्ति ते सुप्रतिष्ठाम् ॥ ।।१३२।।

चन्द्रोदया दिव ममाभ्युदया त्पयोधिः
त्वं चोत्तरङ्गितरसो मधुरान्तरङ्गः ।
रत्नानि भाव मधुराणि मुखे पदानि
सद्यः क्षिपस्यहमपि ग्रथकोऽत्रहारे ‖ ॥१३३॥

भाषाया ममराणां
भाषायां मम च बिन्दुत स्त्वत्तः ।
ब्राह्म भारद्वाजं
ह्युभयरसं योगमैश्वरं विन्दे ॥१३४॥

सदा द्रवद्धृदयरसः परं रमे
तव स्तुतौ रसहृदयेव लेखिनी ।
भवत्यधः प्रचुरतमोमषीरसः
स्फुरत्यतः किमपि मनोहरं महः || ।।१३५।।

कल्याणेऽस्मिं स्ते गुरोश्श्रीसमैक्ये
जीवब्रह्मैक्यानुसन्धान रूपे
काव्ये स्थूलारुन्धतीन्यायतोऽहं
ब्रह्मस्थाना त्त्वन्महोऽदर्शयं त्वाम् || ।।१३६।।

स्तुतिः प्रसूति र्मम ते मनः प्रिया
प्रियस्त्वमस्या हृदयैकगाहनः ।
द्वये तदद्वैतमिदं भजत्यतः
कुतोऽयमस्मिन् सदसद्विवादः || ॥१३७॥

यद्वेदनाया स्समभिष्ठुतं त-
त्सौन्दर्य मार्यैरनुभूतिधुर्यैः ।
तद्वेदनाभि श्श्रुतिभिर्ह्यवेद्यं
गीर्भिः प्रपद्ये गुरुमर्थ माद्यम् || ।।१३८।।

लिप्यां भावः विन्दते शब्दरूपं
तस्मिं श्चार्थव्यक्तयो वृत्तिमूलाः ।
तस्या ज्ञानं तत्प्रयोगे निदानं
तन्मूलं त्वां विश्वतश्चक्षुरीडे || ॥१३९॥

जडानां वर्णानामजडपर चैतन्यवपुषः
सदर्थ स्यासङ्गा द्भवति हृदये स्पन्दन मपि ।
अयस्कान्तासङ्गादयस इव तत् स्पन्दनवशात्
य आनन्द स्तं च श्रुतिरवददर्थं रस इति ।। ‖ ॥१४०॥

कवे श्रोतुस्सङ्ग श्चितियदिभवे द्वर्णशबलं
तदा चित्तं शून्यं भवति परमैक्यं भजति च ।
तदैक्य स्फूर्तेर्वा रसिक इह चात्मैव भवती
त्यतद्भिन्नं मानं गुरुमिह भवन्तं हि कलये ‖ ।। १४१ ।।

अस्तित्वं तद्वस्तुनो भावरूपं
भाव स्सत्ता साऽपि निश्शब्दबोध्या ।
संवित् तस्याः प्रत्ययः प्रत्ययेन
स्यात्तस्मात्तं त्वामुपासे ह्यशब्दम् ।। ।। १४२।।

आदि क्षकारान्त समस्त वर्णा-
स्समाहृता ह्यक्षपदेन विश्वम् ।
तद्ग्राह्यमेतत्सकलं हि दृश्यं
तद्ग्राहकं चेन्द्रिय मक्षमाहुः ‖ ॥१४३॥

गुरुर्यतोऽनीदृगनक्षगम्यो
हगक्षमालाग्रगमेरुरम्यः ।
ततो भजे त्वां गुरु मिन्द्रियाणा-
मगम्य मप्यात्मतया सुगम्यम् ॥ ॥१४४॥

ज्ञान प्रकाशार्थकधातुसिद्धं
नामद्वयं तज्जडमप्यपेतम् ।
द्वैतान्निवृत्ताव जडं च तत्त्वं
त्वं तद्यदि स्याः किमु तत्र चित्रम् ॥॥१४५॥

तत्त्वमित्ययि पदार्थतः पदं
न यं द्वयमिवावभासते ।
तद्वदात्म परमात्म भेदतः
तत्वतस्त्वमपि चाद्वयं द्वयम् ॥ ॥१४६॥

वीणावाण्योस्स्वर विनिमयत-
स्सिद्धाऽभेद श्श्रुति समरसयोः ।
तत्रेमामित्यनुरण वशा-
द्भेदेऽभेद स्स्वरस इह भवान् ॥ ।।१४७।।

बीजपदे हि तथा खलु जीवः
जीवपदेऽपि तथैव स बीजः ।
तत्स्वरसम्पदभेदविकासं
त्वामुभयार्थ मये ह्यभयार्थम् || ॥१४८॥

ब्रह्म निर्गुणमपि स्वतो भवान्
गौणतस्तु भगवा नितीड्यते ।
द्वैतमेव खलु गाहितं यतो
भाक्षरेण भवतावता समम् ॥ ।। १४९।।

उभयात्मक भावना भयाय
प्रभवे दित्यभयात्मकं भजे त्वाम् ।
स्वरतोह्यपराधतस्त्वनर्थ –
स्सुमहान्नश्श्रुतिविश्रुतो यतोऽसौ ॥ ||१५०॥

प्रायोऽन्तगं तत्सकलं समस्ते
व्यनक्ति दृश्यं पदमन्तरस्थम् ।
सर्वान्तरं निष्कल मात्मवस्तु
व्यनक्ति तत्त्वेन विभावये त्वाम् || ॥१५१॥

प्रातिपदिकतो यल्लिङ्ग मुख्यावबोधे
अव्ययमुखगम्यं प्रत्ययं लुप्त माहुः ।
एव मनुजिघृक्षुः प्राप्तलिङ्गोऽप्यलेपः
प्रातिपदिकमात्र शिष्यसे तत् भजे  त्वाम् || ॥१५२॥

कप्रत्ययस्य प्रकृति विचित्रं
प्रायः पदं स्वार्थ इति प्रसिद्ध्या ।
बुधो भवे त्प्रत्ययवान् यतस्ते
कस्मै नम श्चित्स्वरसायकाय || ॥१५३॥

लोकेऽनुकम्पा करुणादिनाम
पर्यायतोऽभिन्न मथाऽपि भिन्नम् ।
व्युत्पत्तिवादादिह तत्तदर्थाऽ
भेदान्वयो यत्र गुरुं तमीडे ॥ ॥१५४॥

अवेति रक्षार्थक धातु सिद्ध
मोङ्कारमाहुः प्रणवं पदज्ञाः ।
अत स्तदर्थ प्रवणं गुरूणां
गुरुं भवन्तं प्रणमाम्यनन्तम् ॥ ।।१५५।।

बिन्दौ स्पन्दाव्द्योम्नि  त द्विद्युदाभात्
ज्योति र्व्यक्तं व्यक्तनाद स्ततोऽभूत् ।
ओङ्कारोऽसौ तत्प्रवृत्ते निवृत्तेः
सन्ध्या द्वारं शान्त्यगारं श्रये त्वाम् ॥ ।।१५६॥

ओमाहुः पद मेक मक्षर मजं नैकं च न प्रत्ययं
न स्पर्शं च न लिङ्ग मव्यय महो नोष्मं च नान्तस्थकम् ।
तस्माज्जात मशेषवाङ्मयजगद्ब्रह्मात्मकत्वेन तत्
सत्यं तत् त्वमसी त्यरूपक मपि त्वां रूपभाजं भजे |||| १५७ ||

यन्त्रं मन्त्रं तन्त्रमेकं हि भूतै-
श्चित्ते नाप्यं चोभये नाहुरार्याः ।
तत्रोङ्कारं सूक्ष्ममाहुर्निदानं
तत्तेऽरूपस्याऽपि रूपं ह्युपासे || ॥१५८॥

सोऽहं सोऽहमितीरिते हि विजहत्तद्व्यञ्जनं सुस्वरं
मूलाधारमुखेषु षट्सु कमलेष्वञ्चन्त्यसौ नः परा ।
वृत्तिः प्राणमयी निलीय परमे सूक्ष्मेऽर्थतन्मात्रके-
विश्राम्यत्यथ ते पदे परतरे सौधे सहस्रारके || १५९॥

नास्तीत्यत्र च ते नराकृतितया सत्ता स्फुरत्यात्मनः
सामान्येऽप्यमृतोत्तरं सुखमसामान्यं स्फुरस्यन्तरे ।
वस्त्वन्ते त्वमनन्तमन्तमपि नश्चित्रं विभास्यद्वयं॥
स्तोत्रे ऽस्मिन् प्रतिपादितं त्वमसि तत् सत्यं शिवं सुन्दरम्।। ॥१६०॥

मिथ्येत्याहुरिदं जगत् श्रुतिशिरः शुद्धान्त सिद्धान्तिनः
तस्याऽऽहुः पितरा उमात्रिणयनौ तेऽप्यागमज्ञानिनः
कृत्वा मातर मन्तरे पितर मेवाऽऽह बहि २शाब्दिकाः
तत्वख्यापन हेतवेऽत्र गुरवे कस्यै नमः ख्यातये ॥ ॥१६१।।

सांख्यं भक्तिरथाऽपि कर्म परमं योगोऽथवेत्याकुलं
सच्चासच्चिदचित्परा प्रकृतिरित्यत्यन्त मुच्छृङ्खलं
शम्भु विष्णुरुमा रमेति सकलं विश्वं विभेदाकुलं
स्वाचार्यस्य महार्थ विच्युतधियां शाब्दोऽयमाडम्बरः || ।।१६२।।

त्वां ध्यायाम्यहमन्वहं त्वमसि मे ध्येयस्तथाऽहं तव-
ध्यातेत्यत्र तु युष्मदस्मदभिधे वाक्यत्रये गोचरे ।
तत्तत्कारकजात तत्प्रकृति तत्तत्प्रत्यय क्षेपतः
शिष्टं यत्प्रिय मस्ति भाति तदिदं सत्संविदं त्वा मये || || १६३ |

व्यर्थस्सन् वितनोति मोद ममलं रेखाक्रमो रङ्गव-
ल्ल्यामुन्मत्त जडाहितोऽनियतितः क्षोभं ततो गम्यते ।
ज्ञानानन्दमयैक हेतु सकलं दृश्यं ह्यधिष्ठानदृग् –
गम्यं रम्यमतोऽन्यदन्यदिति तत्वामाश्रये स्वाश्रयम् ॥ ।।१६४।।

वृद्ध्यनुभावि गुणाविर्भावं व्याकृतनाम विचित्रित रूपम् ।
अद्वयमेव परं त्वामन्ते तन्त्रमये शिव सूत्रात्मानम् ॥ ।।१६५

# ११. प्रकाशतरङ्गः

श्रुत्यन्तवर्त्मसु विमृग्य विमर्श धूली-
पालीषु यन्ति मणिगुप्तिषु तत्प्रकाशम् ।
बाला गुरुं मणिमिव स्वतएव सिद्ध-
मन्मीलितं भवति येन तदात्मचक्षुः ॥ ॥१६६॥

जडाजडमये वियत्प्रभृतिभूतपञ्चीकृते
लुठन्ति गुणशक्तयो जगति रुद्रसङ्ज्ञाश्रितः ।
त्रिशक्ति कृत जृम्भणा स्तदसि चिद्विमर्शाख्यया
प्रकाश इह गोचर स्त्वमुमया गुरुः शङ्करः ।। ॥१६७॥

हंस स्त्वं त्वदनूच्चलद्रुचिचयो भावः कदम्ब श्रितां
चित्ते मे शशिकान्तदर्पणतले चित्रं स्फुरन् मे पुनः ।
स्तोत्रेऽस्मिन् रसवीचिका तरलिते पद्माकरे प्रस्फुरन्
त्वामञ्चत्कलहंस मेव कलयत्यद्वैत मत्यद्भुतम् ॥ ।।१६८।।

बिम्बं चित्प्रतिबिंबितं जगदिदं दृश्यं समस्तं पुनः
शुद्धान्तःकरणं तदेव करणं बिम्बग्रहे दर्पणम् ।
बिम्बस्फोरक एष केवल रसालेपोऽवमृष्टस्सचेत्
तत्राभाति न दृश्य मुल्लसति तत्ज्योति स्स्वयंज्योतिषि ।। ।।१६९।।

भानोरुन्मुख एव दर्पणतले बिम्बं पत्यात्मन-
श्चौन्मुख्यं भजति स्फुरत्यथ भवानात्मा तथा चेतसि ।
व्यत्यस्ते ह्युभयत्र चास्य जगतो भानं तदाभासकं
ज्योतिश्चाऽपि तदेव तत्परमहं ज्योतिर्भवन्तं श्रये || ॥१६९॥

धीसृष्टिस्सकला हि सृष्टिरचना चैतन्यतस्साक्षितः
सर्वं चेतयते जडं रविमुखे पद्मं यथा विश्लथम् ।

व्यक्तिस्तद्वदिहाऽपि पुण्यमहसां साक्षी गुरुस्तत्कृपा-
दीप्तिश्चोदयते धियं हि परमां छात्रे गुरा वुन्मुखे ॥ ॥ १७१ ॥

त्वमादि स्वरार्थ स्तदन्ते तदाद्ये
परं स्पर्शवर्णे त्वमाद्यन्तयोश्च ।
पुनः स्पर्शयोरौत्तरस्पर्शयुग्मे
परान्ते विशेष्योऽविशेष्यो विभासि || ।।१७२।।

स्थितेः प्राहुरार्या भवन्तं हि सृष्टेः
लयस्याऽपि कतार्रमेकं त्रिरूपम् ।
त्रिनामानमेतन्मतं कार्यदृष्ट्या
स्वत स्त्वं " डुकृञ् " धात्वतीतोऽसि किं वा । ॥१७३॥

अनादेरहङ्कारतः कर्मबीजात्
जगत्सम्प्रवृत्तं धिया संस्थितं च ।
लयं याति सर्वं तदेतद्धिमाया-
कृतं भाति निद्राकृतस्वप्नशोभम् ॥।।१७४।।

इयं का नु माया हि निद्राऽऽगता स्यात्
कुतो वेति या मावधीत्थं विचार्य ।
गता स्तास्तु निद्रां विनिद्राश्च या मां
गतास्ते प्रजास्त्वत्पदारुण्य शोभाम् ॥ ।।।१७५।।

मिथस्तस्तमश्च प्रकाशो विरुद्धौ
तयो श्छायया यौगपद्यञ्च सिद्धम्
ततश्शुद्ध मालिन्य वैधर्म्य रूपा
स्थिता च्छायया सोपमेया हि माया ।। ।।१७६।।

विशुद्धार्थदाऽन्या तिरोधानकर्त्री
तथा ता मुपास्याऽन्यथा तामपास्य ।

त्यजन्त्यात्मभेदप्रसर्पं हि सर्प
भ्रमं रज्जुमुक्ता स्ततोऽप्यन्ततस्ताम् ॥ ॥१७७॥

अधश्छायया संश्रितं दीप पात्रं
तथा मायया च श्रितं जीवतत्वम्
इयं नास्ति चात्मोन्मुखे वस्त्ववस्तु
प्रकारः किमस्तीदृगन्यो विकारः || ॥१७८॥

तयैतज्जगद्भाति नानाविभासं
विभात्येतदात्मन्यहो नो विभाति
अभानेऽपि भानेऽनुविद्धं यदन्त-
स्तदन्तश्रये ज्योतिरन्तर्भवन्तम् ||।।१७९।।

गुहायाञ्च गुह्यां स्वयं सुप्रभान्तां
सुधीरस्स्वत श्चाविनाभूतसत्ताम् ।
त्वयैकां तयैकं तथैवाह मीक्षे
महस्तत् तदाहं च पूर्णाह मीक्षे ॥ ॥१८०॥

चतुर्वस्तुसङ्घः प्रदीपोऽक्षयोऽयं
भवेदीषदीषत् क्षयो वस्तुनोश्चेत् ।
तयोस्तत्समग्रक्षये ऽयं समग्रः
स्वकाधार शम्यावशिष्टो निलीयेत् ॥ ॥१८१॥

विराट् तद्गुणानां च शक्तेस्समष्टिः
तमस्त द्रजश्चेत्क्षतं दीप्तमूर्तिः ।
तयोस्तत्समग्रक्षये ऽयं समग्रः
स्वकाधारशक्त्यावशिष्टो निलीयेत् ॥ ।। १८२।।

यथा दीपसापेक्षकं साधनं तत्
तथाऽत्राऽपि शक्तिर्व्यपेक्षावती स्यात् ।

प्रभोस्सर्वशक्तेस्ततश्शक्ति तद्व
द्विपक्षा ऽनधीनं भजे त्वां सुधीनम् ॥ ।।१८३।।

पटान्तः प्रकाशो न चे च्छायया न-
स्फुरत्येव चित्रं जगच्चित्र मेवम् ।
हृदन्तस्त्वमीशो न चेन्मायया न
स्फुरत्येव तत्त्वामये चित्प्रकाशम् ||।। १८४।।

ततोऽहन्तु मायाकृतं विश्वचित्रं
निरस्याऽपि शुद्धा मुपास्याऽपि तस्याम् ।
स्वतोऽपावृतायां प्रदत्तान्तरायां
प्रविश्यान्तरान्तः कमप्यर्थ मीक्षे || ।।१८५ ।।

पुरस्ताच्च पश्चादधास्ता त्परस्ता-
तथा पार्श्वयो स्सर्वतो देशतश्च ।
उषः प्रातरह्नि प्रभुस्त्वं दिनान्ते
निशायां च सन्ध्यागतः कालत स्त्वम् ॥ ॥१८६॥

सुरेन्द्रा नमन्मौलि कोटीर कोटि
स्फुरद्रत्न मञ्जुप्रभा दीपपुञ्जः ।
त्वदाज्ञा प्रसादेन धन्यत्वसिद्धयै
त्वरन्ते त्वदीयाङ्घ्रि नीराजनाय || ॥१८७॥

अजाण्डे प्रतीऽकेत्र पिण्डाण्डके य
स्सुरर्ष्यादिवर्ग समग्रोऽस्तिसर्गः ।
त्वगादीन्द्रियार्थानधिष्ठाय चाज्ञा
वशो वर्तते त्वद्वशान् रक्षते च ॥ ||१८८ ।।

प्रभुत्वं यत स्सार्वभौमो यत स्त्वं
यत स्त्वं नियन्ताऽनियन्ता यत स्त्वम् ।

दिगन्तैक कान्ता अनन्ता अजान्ता ॥
भयात्त्वत्त्वदाप्ता नवत्यस्वतन्त्राः || ||१८९ ।।

स एवाणिमादे र्विभूते विलासो
विलीनाश्च तस्मिन् मनोलीन मात्रे ।
कुलीनाश्चयोगे प्रलीनाः प्रयोगे
कृपातस्ततो मामपायाच्च पायाः || ||१९० ।।

यदेतत्पुरालब्धपुण्योदयाप्तं
सुखं दैव्यमाप्तं भवत्कर्तृकं ते ।
बुधा मन्यमाना भजन्ते भवन्तं
तदेषामुदासीन एवाऽसि नाथः || ||१९१ ।।

असङ्गेऽनपेक्षे स्वसाक्षिण्यमेये
न सङ्कल्पलेशो भवेद्वा विकल्पः ।
त्वयीदन्तु भक्त्या समध्यस्य भक्ता
विशुद्धान्तरा ध्वस्तवेगा भवन्ति ॥ ||१९१ ।।

क्रमादाप्तकामा निरस्तार्थकामाः
स्वधर्माद्विशुद्धान्तरा मोक्षकामाः ।
तत स्तेऽप्युदासीनभावं भजन्ते
भवद्भावनात्ताऽऽत्मतृप्ता विमुक्ताः || ||१९२ ।।

तदा शेषभावो न तेषामथाऽपि
त्वयीदं गुरुत्वं कदा हीयते न ।
नदीनां नदीत्वे गतेऽप्यब्धिभावा-
त्कदाऽप्यब्धिता किं न हीयेत वार्धेः ॥ ॥१९३॥

पिता शङ्करो न स्तदद्वैत वृत्तिः
प्रसू २शाङ्करी तत्सपर्या विलासे ।

शिशुः क्रीडते तद्विभावानु भाव-
प्रभूतानुभूते भवान् पूर्णपात्रम् ॥ ।।१९५।।

गुरुः शङ्कर स्त्वं शिवश्शङ्कर स्त्वं
पुन शङ्करोषि स्वत स्स्वं करोषि ।
न नश्शङ्कितं तन्मन श्चाङ्कितं ते
नम शङ्कराय प्रभो श्रीकराय ॥।।१९६।।

क्वचिन्मानभावः क्वचिद्दीनभावः
क्वचिद्धीरभावः क्वचिद्भीरुभावः ।
विचित्रः स्वभाव स्त्वदीयात्प्रभावात्
तदीयोह्य भावोऽनुभाव्यः प्रभो मे ॥ ॥१९७॥

विचितं हि चित्तं प्रसुप्तं कदाचित्
प्रबुद्धं कदाचिन्निबद्धं क्वचिच्च ।
चिदाख्याव्यये नानुवृत्तं यदेत -
त्तदेवैमि तेन प्रमुक्तश्च भूयाम् ॥ ॥१९८॥

मदन्तर्लुठन्ति प्रभो केऽपि शब्दा-
स्तदन्तः स्फुरन्ति प्रभो केऽपि चार्थाः ।
अनन्ता ह्यनन्ते त्वयीमे हि शान्ता
ममैकान्तिकान्तः प्रशान्त्यै भवन्तु ।।१९९ ।।

पटाटोपतो दुर्घटाटोपतो वा
जटाटोपत श्चोत्कटा दुद्भटाश्च ।
जटाजूट कोटीर कोटि त्विषस्ते
वटान्त र्निषण्णस्य मौनात्समौनाः ॥ ।।२००॥

तपः किं जपः किं स्तुतिः किं नतिः किं
पतित्वं ततोऽप्यन्तत स्सोपचारम् ।

किमेत ज्जगच्छिक्षणार्थं वृणीषे
तदेत द्विसर्गोन्मुखं नामरूपम् ॥।।२०१॥

दया ते स्वभावोऽभयं ते पदं नि-
श्चयात्ते च्यवन्ते न सन्त स्त्वदीयाः ।
भयं मे विनेयं दयाऽस्मिन् विधेये-
त्यलं वत्सलं मे मनो मौनयोगे ||।।२०२।।

भवानप्रमेय प्रमेयः प्रमातृ-
प्रमेय प्रमाणादि भाषा विलासम् ।
तदध्यात्मशास्त्रस्य लास्यं विहस्य
स्वतो मौनतो वस्तु किं वा भवामः || ॥२०३॥

त्वदन्ते वसन्तो वसन्तं हृदन्त-
र्वसन्तं यथाऽप्तं तथा भावयन्तः ।
वसन्ताननन्तान् मुदा यापयन्तः
कृतान्तं च सन्तर्जयन्तश्चरामः || ॥२०४॥

पराऽपर विचार मत दूरतरमन्त-
श्चराचर जगद्भर धुरन्धर मुपासे ।
निरावरण भास्कर सुधाकर सहस्रो-
त्करान्तर महश्चरणविस्फुरण मीडे || ।।२०५।।

## १२. अद्वैतपञ्चकम्

नलिने च तदन्तरालि वर्णे
कृतभेदं धृतनैल्य मद्वितीयम् ।
नयनं तव सद्वितीय मासी-
त्कथ मद्वैतगति र्विभेददृष्टेः ॥ ।।२०६॥

स्वयमीश तनोषि मां विहाय
स्फुटरागं यदुमापदेऽद्वितीयः ।
असि तेन शिव श्शिवाद्वितीयः
कथ मद्वैतगति स्सरागवृत्तेः ॥२०७॥

अपि यासि यया विदात्म सङ्गं
बत तत् स्त्रीत्वमथाऽपि नाम रूपम् ।
भजसेऽद्वय एव सद्वितीयः
कथमद्वैत धृतिस्ससङ्गवृत्तेः ॥ ॥२०८॥

तनुषे परमे हि शून्य नादे
बृहिधातु प्रतिपन्न नामरूपे ।
पुरतः स्फुरणं न हे शिवाद्ये
कथ मद्वैतमति विरुद्धरीतेः || ।।२०९॥

सकलं पदमेवमर्थशून्यं
त्वयि वस्तु न्यकलेऽनुमानगम्ये ।
कलयेऽहमत स्तदेव सत्यं
परमाद्वैत मुपास्य मौनमुद्राम् ॥ ॥२१०॥

समुदितेऽस्तमयाभिमुखेऽब्जिनी
हृदयरागकरे खलु भास्करे ।
कुमुदिनी रमणे वियदङ्गणेऽ

प्युडुगणे च भवन्तमये घृणिम् ॥ ।।२११।।

सुमनसां मनसाऽपि समर्चने
सुमनसां वचसा मपि सौरभे ।
तनुमनोनयन श्रवणाद्भुते
।स्फुरसि न स्त्व मतीन्द्रियसुन्दरः ‖ ।।२१२।।

नवरसे कवितास्वरसे स्वत-
स्सुविहिते ऽन्नरसेपि च षड्रसे ।
स्वरलयाञ्चितगानसुधारसे
स्फुरति मे ऽनुभवैकरसो भवान् ॥।।२१३।।

परमकर्कशतर्क विखण्डने
श्रुति शिरोवचसामपि मण्डने ।
सुरमुखेऽपि मखे द्विजसम्मुखे
पदविधौ त्वमसि स्फुरणं चितः ‖ ।।२१४ ।।

शशिमुखेऽमृतरोचिषि सुस्मिते
विशदवल्गु वचो जुषि नन्दने ।
वशिजने परमायु रुपेयुषि
स्फुटमहं भवत सुषमा मये ।।।२१५।।

## ऋतुरूपेण श्री गुरुमूर्त्यनुसन्धानम् -

**वसन्तः**
नववसन्त दिनान्त सुहासिनी
दिशति ते हृदयं मम मल्लिका ।
सरल मन्दगति स्सुरसाकृशानु
विशति ते हृदयं न कवेरजा || ॥२१६॥

**ग्रीष्मः**
व्रतमुपेत्य यतेस्तव सक्तुभिः
परिणताम्रफलैर्लघु जीवनः ।
तप उपात्ततपा स्समुपादधौ
विकचपाटल डम्बर मम्बरम् ॥।।२१७।।

**वर्षः**
उरुनिदाघ दिनात्ययशीतल
स्त्वमिव नो जलदो रसपेशलः ।
स्फुरति नीलगलो धृत चन्द्रिक
स्सपदि ते कलयन् नटराजताम् ॥।।२१८।।

**शरद्**
शरदुदार सरस्तरलै स्सरो
रुहशतस्फुरणैः प्लुत दिङ्मुखैः ।
परिमलै र्भजते गलितेषणा
परिमलन्तु भवन्त महं यथा ॥।।२१९॥

नवनवोन्मिष दब्ज दलद्दल
क्रमविमोहन चङ्क्रमणक्रमम् ।
अह मिवाञ्चति ते पदमञ्जसा
शरदि हंसकुलं सकलं प्रभो ॥ ।२२०।।

हविरूपाहित माग्रयणेष्टिकं
तव मुखं चरणं तव भूतलम् ।
मम वचः क्रमतोऽह मिव प्रभो
शरदि पूर्णतिथौ भजतः परम् ॥ ।।२२१।।

**हेमन्तः**
भवति यज्वभिरिष्टि विशेषतो
भवति यज्ञपतौ हविराहितम् ।
धनुषि चङ्क्रमणे मकरे रवे
र्भवति सङ्क्रमणे च हिमागमे ॥ ।।२२२।।
शिशिरः

हसित कुन्दसुमै र्गलितामृतै-
रपि च पाशुपतै शिशशिर श्शिवम् ।
तव शिवस्य निशीथ समर्चने
भजति लिङ्ग समुद्भव हेतुकम् ॥ ।।२२३।।

तरुणयाऽऽभरणायित चित्सुख
करुणया ह्यनया चरणानतो
स्फुरणयाऽरुणया वपुष श्श्रियः ।
द्धरणयात्वमुमा रमणस्तया ॥ ।।२२४।।

**रागमालिका**
भूपाल प्रतिबोधित स्त्वमुषसि प्रातश्च केदारगः
धन्यासि स्तुतिगोचरा मनुगत श्शुद्धां च सोल्लासकाम् ।
कावेरीं सुरमोहिनीं च सुरटां सन्मध्यमामद्भुतं
गौरीं श्री मणिरङ्गगां बहुविधं श्रीरञ्जनीमर्चयन् ।। । २२५।।

रागं साधुमुखारिमीक्ष्य परमं कल्याणियोगं गत-

स्तन्वंश्चारुवरालि मात्मनि वहन् साक्षा ज्जयन्त श्रियम् ।
सारङ्गाङ्क कलाधरो ह्यवधरन् वाचस्पते र्गीतकं
श्रीरामप्रिय शङ्कराभरण धीवृत्तिः परां भैरवीं ॥ ।।२२६।।

सम्भाव्याऽथ सुमोहनं ह्यनुवदन् श्रीकीरवाणीं श्रुतिं
श्रुत्यन्तार्थ वसन्तराग रसिक स्त्वं सार्वभौमो यतिः ।
दान्त शान्त इहौषसं परशिव श्री सुन्दरीदेवता
सेवाराज्य धुरन्धरो विजयसे नीराग रागक्रमः ।। ।।२२७।।

क्वचिद्द्वारेऽगारे क्वचिदपि विदूरे परिसरे
क्वचि न्नीरे नद्याः क्वचिदपि च तीरे सुमधुरे ।
वसन मौनेऽमौने विपुलपुलिने देवसदनेऽप्यनीह-
व्यामोहं कलयसि रसं न स्समरसम् ॥ ।।२२८।।

श्रुत्या क्रीडसि मोदसे स्मृतिचयै र्व्यासोक्तसूत्रो क्तिभिः
प्रीणासि प्रणयात्कलाश्च सकलाः क्रीणासि नैजश्रिया ।
पुष्णा स्वागमिक श्रियामपि मनो मुष्णासि भावेन त-
द्भिक्षूणामपि नायक स्त्वमसि नो दक्षः प्रभुर्दक्षिणः ॥ ।।२२९॥

स्थायीभावोरति रुपचितो याति श्रृङ्गारभावं
तस्याज्ज्वल्यं भवति शुचित श्रीगुरोश्चावलम्बात् ।
विन्दन् दुःखं सुखमपि गुरौ दूरगे द्वारगे वा
निष्प्रारब्धो गुणमयमयं देहमाप्तो जहाति ।। ॥२३०॥

आसीन प्रचलायितं मम मनः स्थाणुं भवन्तं गुरुं
लब्ध्वा नोलभते हि योगमचलं लब्ध्वा यथा वानरः ।
स्वात्मानं नभजत्यो पुनरयं चात्माऽपि सन् वानरः
किं वा भेदवतां भवेदनुभवो माया विपर्यासिनाम् ॥ ॥२३१॥

वेद्यं सर्वं गुरुमुखत इत्याहु रन्ते रहस्यं

व्याख्यातारो गहनहृदया मन्त्रतन्त्रेषु लुब्धाः ।
किं वा तेषामपि भजनत स्स्वात्मदस्त्वं यतस्त्वा-
मद्यैवाप्तं परमकरुणासिन्धु मेवाश्रयामः ||॥२३२॥

महायोगा स्सर्वे ग्रहगति समावेशवशगाः
क्षयंभोगाद्यान्ति क्षणिकसुखमाताः पुनरयम् ।
गुरो योगो भोगादुपचिति महो यात्यवितथं
सुखं सूते सच्चिन्मय मनुगतोऽनुग्रहबलात् ॥ ॥ २३३।।

प्रारब्धं दृढबन्धनं यदि भवे ज्जन्मा न्यसङ्ख्यानि ता-
न्यभ्यस्तानि भवन्तु नाम न वयं मन्यामहे श्री गुरो ।
वत्सान् गौरिव भक्त वत्सल । कृपापाथोनिधे । त्वत्कृत -
प्राणान् स्त्वं ह्यनुसृत्य खिद्यसि यतस्तेनैव दूयामहे || ।।२३४ ।।

खेदः कस्तव वारिचालनवशा त्किं चालनं भास्वतः
सम्भाव्यं तदतत्त्व दृग्विलसनादुक्तं प्रभो क्षम्यताम् ।
नो वाचः प्रसरन्ति संविदि विभौ स्वार्थैः परार्थे त्वयी –
त्येत ज्जल्पनमेव मे तदपि मे वाक्छुद्धये कल्प्यताम् || || २३५ ||

आत्मीयं कुरुते यतः प्रभुरिदं स्वस्थं समस्तं जगत्
स्वात्मानं मनुते जनं स हि जन स्तेनात्मवान् राजते ।
आत्मार्थं तनुते वच स्तदपि न स्सार्थं ततस्त्वां विभुं
किं वा कर्तुमकर्तु मन्यविधिना कर्तुं तटस्थं नुमः ॥ ॥२३६॥

कति कति न सन्ति पुरुषाः कति कति वा स्युः स्त्रिय स्तथा पूज्याः ।
द्वन्द्वं कि मस्ति तादृक् य द्वन्द्वं त्वामसूत निर्द्वन्द्वम् ।। ॥२३७॥

कति कति शिक्षागुरवः कति कति नौपाधिका स्तथागुरवः ।
गौरवमिहाऽस्ति किं तद्गुरुलघु समभाव गौरवं त्वयीव ||॥२३८॥

कति कति न सन्ति जीवाः कति कति वा जगति न स्युरीशाश्च ।
ऐक्यं किमस्ति तेषां यत् त्वद्द्वावेवऽऽलोक्यते स्वैक्यम् ॥ ॥२३९॥

किमय मसम्भाष्य स्ते भाष्यमहावाक्यरत्नभूष्यस्य ।
किमय मसम्प्रेष्यस्ते प्रेष्यसुरेन्द्राद्यधृष्यशिष्यस्य ॥ ।।२४०॥

स्पन्दन माधरमपि ते सुन्दर सन्दर्शयितु मनास्थ स्त्वम् ।
चन्दन शीतल मपि ते मन्दस्मित मिन्दुधर कुतो न मयि ।।।। २४१।।

वन्दनमपि बृन्दारक वन्दित किमु में न रोचते किमु ते ।
निन्दितमपहर मत्कृत मान्दोलन मपनयान्तरङ्गीणम् ॥ ।। २४२ ।।

कर्तव्यं बहु मे भुवि, वक्तव्यं भासते च बहुधा मे ।
मन्तव्यं हर बहु मे हर तव्यप्रत्ययैक वृत्तिं ताम् ॥ ।।२४३।।

वचनीयं बहु मे त्वयि, रचनीयं स्फुरतु सर्वदा त्वयि में
मननीयं चास्तु यतो निर्वृत्ति त्रिकरणं भवेन्निभृतम् ॥ ॥ २४४ ॥

## १३. श्री पादुकातरङ्गः

मूलाधारे स्वपिति कुहरे पन्नगी काऽपि बुद्धा
स्वाधिष्ठान प्रभृति पदवी मुन्मुखी सन्निपत्य ।
पत्यु स्साक्षा च्छिव तव पदे श्रीसहस्रार पद्मे
संवित्सारां वमति परमानन्द मारन्दधाराम् ॥ ॥२४५॥

मन्दार स्तबकायितं शिरसि नः काश्मीर मुद्रायितं
विस्मेरारुण वारिजायित महो विद्युत्प्रदीपायितम् ।
शून्येऽन्तर्दहरे पुन श्रुति शिरःकोटीररत्नायितं
वन्दे श्रीचरणं गुरोः किसलय प्रस्पर्धि रागायितम् ॥ ॥ २४६ ॥

कृत प्रारम्भा स्ते सकल मतभेदा गुरुपदान्-
मतानां सर्वेषामुपरि चरणं तस्य निहितम् ।
अतोऽनाद्यन्तं त त्सकल जगता मादि परमं
भजे शान्त्यै साक्षादमतमरजस्कं गुरुपदम् ‖ ।।२४७।।

श्रीमत्त्वदीयचरणं करुणारसाब्धिं
भाग्यावधिं प्रणत सेवधि माश्रयामि ।
यत्कण्ठ रत्नमिव विस्मृत मात्मवस्तु
लब्धं भवत्यवनते मयि यत्प्रसिद्धम् ॥ ॥२४८।।

चित्तं त्वदङ्घ्रि कमला श्रयलब्ध बोध-
मारन्द माधुकरवृत्ति मुपेत्य चित्रम् ।
सद्ब्रह्मचर्य मवलम्ब्य ततो निरस्त
तापं ममाविशति चाश्रम माश्रमं वः ॥ ।।२४९॥

कदा वा स्प्रक्ष्ये श्री चरण चरणं दीनशरणं
कदा वा द्रक्ष्ये श्री वदनकमलं बोध विमलम् ।

कदा वा यक्ष्ये श्री भजन यजनं मुक्ति सृजनं
कदा वा सर्वस्वार्पण परमपुण्यं त्वयि भजे || ॥२५०॥

कदा वाऽस्मत् क्षेम प्रसव परतन्त्रे त्वयि रमे
कदा वा निर्धूत प्रबल विपदं ते पदमये ।
कदा वोन्मज्जेयं मधुप इव तेऽङ्घ्रिकमल-
स्फुरद्ब्रह्मानन्द प्रचुर मकरन्द श्रुतिझरीम् ||।। २५१ ।।

शैवं शाक्त मथाऽपि वैष्णवमिति प्रस्थान भेदेषु ते
वैरं यान्तु परस्परं विवदने प्रौढ़ा स्तथा राजसाः ।
अस्माकं गुरुपादपङ्कजरजः पुञ्जेष्वलं क्रीडतां
बालाना मवलम्बनं भवतु तत्सैद्धं मतं सम्मतम् ॥ ।।२५२।।

छायायाः पर मातपोऽस्य दिनकृ छैरण्यगर्भं मह
श्चापोऽन्तं पुनरस्य कोऽप्यभिमतो हेतुश्च निर्हेतुकः ।
भ्रान्ताः स्थूलदृशोऽनिदानमतयश्छाया द्युपास्यान्तरं
शिष्टास्तेऽपि परं महो गुरुपदं स्वास्थ्यं ययु स्सर्वतः ।।।। २५३ ।।

हरिहर समुपास्ता वाक्षरी काऽपि शाब्दी
कलयति च तथार्थी भावना द्वैत सिद्धिम् ।
गुरुपद मत एकं न श्शरण्ये शरण्यं
गलित सकलभेदे केवलाद्वैतबोध ||।। २५४।।

हरिहरयो स्स्वरतो यत एवं स्फुरति परापर भेद विवादः ।
गुरुपद तस्तदुदस्त इतीदं तदभयदं पदमेत दुपासे || ।। २५५ ।।

गुरुपद समवाप्तौ तद्धिते गौरवं स्या-
लघुपद समवाप्तौ लाघवं वा न चित्रम् ।
लघु भजनमपि त्वय्यात्मलाभे लघुत्वं
कलयदपि विचित्रं गौरवं चादधाति || ।।२५६।।

यत्र विधि स्सनिषेध मपास्तो यत्र मन स्स्वरथं विजहाति ।
यत्र वचो विरतिं समुपैति त्वत्पद मेव पदं तदुपासे || ।।२५७॥

सुन्दर तव सुन्दर पद सन्दर्शन वन्दनानुसन्धान स्रक् ।
चन्दन धारण लेपन सौन्दर्यानन्द सार सारं याचे ॥ ।। २५८॥

तवचरणं शरणं मम तव वचनं मधु रसायनं मयि तप्ते ।
तव हृदयं सदयं मयि भवतु मुदां ज्ञान सम्पदा मुदयाय ।। ।। २५९।।

शरणं भव भव जलधे स्तरणं कुरु मे स्वरूप चिवृत्तेः ।
स्फुरणं देहि शरण्यं चरणं मे शिरसि संविधेहि दयाब्धे || ॥२६०॥

शरणागत धिषणामृत किरणं द्युतिमसृणं
वरणायित करुणारस वरुणालय मरुणम् ।
स्फुरणादनुसरणादनुरमणादघहरणं
शरणं गुरुचरणं मम तरणे स्ववितरणे ||॥२६१।।

## शिशुगीतप्रारम्भः

जयति तेऽधिकं जन्मना जगत्
श्रिय उपाश्रयं चिद्रसोदयम् ।
भयनिरासकं भद्रदं यत
स्स्वय मिहाऽङ्कितं त्वत्पदाम्बुजम् ॥ ।।२६२।।

परम या सुतं त्वामसूतया
वरयते मुहु स्त्वां तपोरमा ।
धरणि मण्डलं तत्पदाम्बुज
च्छुरितरेणुना सुष्ठु शोभनम् ॥।।२६३॥

न खलु केवलं नाथ । ना भवान्
सुखमयं वपु श्शुद्धचिन्मयम् ।
सख । उदेयिवान् साधुरक्षणे
ह्यखिलदेहिनामन्तरात्मदृक् ॥ ॥२६४॥

त्रिपुरसुन्दरी देवता भवान्
त्रिपुरवैरिणिः श्रीकलाऽसि नः ।
तप उपासनं तत्त्वचिन्तनं
सुपरिपाकत श्शोभनं त्वया ॥ ॥२६५॥

त्वमसि तत् परं ब्रह्म नः परं
त्वमविनाकृता तत्त्वत स्ततः ।
समयिनां पराशक्तिरीश्वरी
त्वमसि नः प्रसूः स्तन्यपायिनाम् ॥ ॥२६६॥

कलिरयं खलः काल इत्यलं
कलुषितं मनः क्लान्ति मृच्छति ।

कलिहरो भवान् काल काल
इत्यलघु वीक्ष्य तद्‌भ्रान्ति मुज्झति ॥॥२६७॥

शरणमागता स्सत्य मक्षयं
चरणमद्य ते चारुलक्षणम् ।
स्फुरण मङ्गलं पूर्णभावदं
करुणयाऽद्य नः कान्त दर्शितम् ॥॥२६८॥

शमनकिङ्करात् संसृतेर्ज्वरात्
विमत धर्षणाद्विश्वतोऽनयात् ।
सुमनसां पते क्षुत्तृषादितः
रमण ते मुहुः रक्षिता वयम् ॥॥ २६९॥

उषसि बोधयस्युत्थितो बहि
षम भूतले वीक्ष्य न श्शये ।
सुषमया स्वयं शोभमानया
ऋषिरिवारुण श्श्रीनिकेतनः || ॥२७०॥

विरहविह्वलान् वीक्ष्य न श्श्रमात्
चरणमागतान् सौम्य लालने ।
त्वरित मीश्वरं त्वां हि पश्यतां
तरलितं मनः तर्पितं च नः ॥।।२७१।।

विरसमात्मनः प्रेष्य नो गृहान्
चरसि नःपुर स्सर्वगोचरः ।
करुणया मुहुः कम्पितस्य
ते गुरुरिति प्रथा कूटकल्पना ||।।२७२।।

करतलेऽशनं क्ष्मातले शयं
चिरतरस्मृतिं चित्सुखाकृतिम् ।

परशिवे रतिं प्राभवेऽच्युतिं
विरति मीक्ष्य ते विस्मिता वयम् ॥॥२७३॥

तरुतले वसन् तत्त्वमुद्रया
परम मौनतः ब्रह्म बोधयन् ।
चिरनिरूढसच्चित्सुखाम्बुधिः
स्फुरसि दक्षिणामूर्तिरेव सन् ॥ ।।२७४ ।।

स्मित मुदेति यत् श्रीमुखाम्बुजात्
वितनुते दृशामद्वयीं श्रियम् ।
नत जनार्ति हन् नर्मते वच-
श्श्रितजनैक सञ्जीवनौषधम् ॥ ।।२७५।।

अपरितृप्तितो व्याकुला वयं
निपुणमप्यहो नीरसं मनः ।
ग्लपयति श्रियं कान्त तत्स्वयं
क्षपय नः परं जाड्यमान्तरम् ॥ ।।२७६।।

सुतपसा श्रुतात् सूनृताद् व्रतात्
सतत भक्तित स्साधुयोगतः ।
न तनुधीवचो नायका वयं
न तदुपेक्षणं न स्तवोचितम् ॥।।२७७।।

रहसि दर्शनं रागकर्शनं
विहरणं च ते विश्वमङ्तलम् ।
महसि वर्तनम् मन्त्र गोपनं
मुहुरुदीक्ष्य सम्मोहिता वयम् ॥।।२७८॥

यदणिमादिभि र्व्यक्त मैश्वरं
पदमवेक्ष्य ते पाद मागताः ।

उदर मन्तरे युञ्जत श्शिशून्
सदय नः पशून् साधु पालय ।।।।२७९।।

दृगसि द्रष्टृता दृश्यता च ते
निगमवल्लकी निस्सृतो ध्वनिः ।
सगुण मेकदा स्तौति निर्गुणं
क्वगतिरीश्वरे वाक्तते श्शिशोः ‖ ।।२८०॥

रक्तारविन्द सुभगं श्रुतिमौलिपुष्पं
स्प्रष्टुं दृशाऽपि चरणं तव नाथ दूये ।
यात्रां च तेन चरसि व्यथते न किंस्वि-
द्यत्रान्तरे भ्रमति धी भवदायुषां नः ‖।।२८१ ।।

यत्ते सुजात चरणाम्बुरुहं स्तनेषु
भीता श्शनैः प्रिय दधीमहि कर्कशेषु ।
ते नाटवी मटसि तद्व्थते न किंस्वि-
द्यत्रान्तरे भ्रमति धी भवदायुषां नः ।। ॥२८२॥

# विनयाधानम्

वाचा मगोचर भवन्त मनन्वितानां
वाचां करोमि विषयं मनसा प्यगम्यम् ।
रम्यं तवैव चरणं शरणं प्रपद्ये
त्रायस्व मामथ सहस्व ममापराधान् ॥ ॥२८३॥

त्वमेव प्रत्यक्षं किमिह बहुना वेद विदितं
परं ब्रह्मासीति स्फुटमवगतं सिद्धवचनम् ।
न चेदेवं भक्त त्रिदिशलतिका श्रीगुणनिका
कथं वाग्गुभेऽस्मिन् भवति चतुरा भावमधुरा ।। ।। २८४।।

आबाल्या त्समधिगतं यत्त त्सर्वं समर्पये बाल्यात् ।
लौल्या द्यशसि ममेदं माल्यं भूयाद्वचस्तवामूल्यम् ॥ ॥ २८५॥

प्रत्यक्षं प्रत्यक्षर मद्राक्षं द्राक्षया द्दक्षरसं ते
अक्षीणेन कटाक्षेणाक्षिप्तं पद मनुक्षण क्षणमस्मिन् ॥ ॥ २८६ ।।

मनस्समुज्जृम्भण मन्वनन्वयं
वचः प्रवाहस्य विजृम्भणं मम ।
निलीय संवित्कलशार्णवे गुरौ
त्वयीदमन्त स्तिमितं भविष्यति ।।॥२८७॥

## अनुसन्धानम्

अनिषेधे निषेधे च यदसू धात्वर्थ गोचरम् ।
ज्ञानं तदव्ययं बिन्दुस्थानीयं त्वामुपास्महे ||।।२८८।।

कामानामीश्वरेणैक्यं गतां त्रिपुरसुन्दरीम् ।
तदीश्वरीं परानन्दझरीं तां त्वामुपास्महे || ।।२८९॥

श्रीं ह्रीं क्लीं बीजरूपां तामोङ्कारार्थ स्वरूपिणीम् ।
शेखरीभूत सोमार्धां मामुमां त्वामुपास्महे || ।।२९०।।

वीणा श्रुत्यन्त नादान्त शान्त तन्मात्र मातृकाम् ।
क्रान्ताखिलदिगन्तां तां परान्तां त्वामुपास्महे ।।।।२९१।।

आद्याहन्तावृत्ति मात्रां पूर्णाहम्भाव भावुकाम् ।
अविद्यां ब्रह्मविद्यां त्वामाद्यां विद्यामुपास्महे ||।।२९२।।

एका द्यनन्तसन्ख्यान्त बैन्दवास्थान मण्डपाम् ।
पूर्णाङ्कां त्वां शिवाङ्कस्थां महाराज्ञीमुपास्महे ||॥२९३॥

वेदागम शिशुक्रीडा विनोदरसिकां शिवाम् ।
उपचार कलोपास्यां स्मितास्यां त्वामुपास्महे || ।।२९४।।

सच्चित्सुखनिधानाप्ति हेतुकां पादुकां पराम् ।
जरामरणविध्वंसि घुटिकां त्वा मुपास्महे || ।।२९५।।

श्रीपादुका महामन्त्रसौध शृङ्तारनायिकाम् ।
चतुश्श्रुति महावाक्य भूमिकां त्वामुपास्महे || ।२९६॥

संसारतीव्रातपतापितानां
शुष्कीभवद्धृन्मुख पुष्कराणां
छाया यतस्स्यादमृतस्य धारा
तस्यै नम श्श्रीगुरुपादुकाये ॥।।२९७।।

जहि जहि त्वमजां स्वबिभीषिकां
कुरु कटाक्षमयी मपि कुञ्चिकाम् ।
विघटय प्रिय हृन्मणि पेटिकां
घटय मेऽत्र च ते मणिपादुकाम् ॥।। २९८।।

श्री श्री श्री त्रिपुराम्बिका तुहिनरुग्रेखा किरीटात्मक
श्री श्री श्री जगदेकदेशिकवर श्रीशङ्करस्थापित ।
श्री श्री श्री युत कामकोटि विलसत्सिंहासनाधिष्ठित
श्री श्री श्री गुरुराजराजमकुट श्रीपादुकायै नमः ॥ ।।२९९॥

काञ्च्यां श्रीमणिकिङ्किणी किणिकिणि क्वाणाञ्चितां काञ्चनीं
कामाक्षी कटिमण्डलोपरि लसत्काञ्चीं विपञ्चीं गिरां
लक्षीकृत्य गुरो र्वचः परिणत प्रत्यक्षर प्रस्रवद्-
द्राक्षेक्षु स्वरसानुभूतिममलामालम्ब्य साक्षान्मया ॥ ॥३००॥

धाराक्षान्त सुवर्णरत्नघटिता सेयं स्तुति श्श्रीगुरोः
अद्वैतागमराज्यरञ्जन यशः पूर्णाभिषेकोत्सवे ।
स्वर्णोदीर्ण महासवे परशिवाभ्यर्णायित प्राभवे
क्लुप्तेया च्छशिमौलि मौलिविलुठन्मन्दाकिनी सौहृदम् ॥॥३०१॥

प्रथित हेमवलम्बि महोत्सवेऽभ्युदित पूर्णरसामृत निर्झरी ।
जनि मृति व्यसन प्रतिजित्वरी गुरुकृपालहरी जयतेतराम् ॥ ॥३०२।।

"गुरुकृपालहरी दिशताच्छ्रियम् ॥"
श्रीः श्रीः श्रीः श्रीः श्रीः